गृत्समद (आङ्गिरसः शौनहोत्रः पश्चाद्) भार्गवः शौनकः।इन्द्रः। १ अष्टिः, २-३ अतिशक्करी, ४ अष्टिः अतिशक्करी वा ।

**त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृपत्सोममपिबद्विष्णुना सुतं यथावशत्।**
**स ईं ममाद महि कर्म कर्तवे महामुरुं सैनं सश्चद्देवो देवं सत्यमिन्द्रं सत्य इन्दुः॥ २.०२२.०१**

त्रिकद्रुकेषु- भूर्भुवरादित्रिषु स्थानेषु । महिषः- महान् । तुविशुष्मः- प्रभूतबलः । विष्णुना- सर्वात्मना ब्रह्मणा । तृपत्- तृप्यन् । सुतं- निष्पन्नम् । यवाशिरं- हव्यमिश्रितम् । सोमं- रसम् । यथावशत्- यथाकामम् । अपिबत्- अनुभूतवान् । सः- असौ सोमो रसः । महां- महात्मानम् । उरुं- विस्तीर्णम् । ईं- एनमिन्द्रम् । महि- महत् । कर्म । कर्तवे- कर्तुम् । ममाद- अमादयत् । सः- असौ । देवः- लीलामयः । सत्यः । इन्दुः- क्लेदनशीलो हृदयस्पृक् सोमो रसः । देवं- द्योतनशीलम् । सत्यम् । एनं- एतम् । इन्द्रम् । सश्चत्- व्याप्नोतु ॥१ ॥

**अध त्विषीमाँ अभ्योजसा क्रिविं युधाभवदा रोदसी अपृणदस्य मज्मना प्र वावृधे।**
**अधत्तान्यं जठरे प्रेमरिच्यत सैनं सश्चद्देवो देवं सत्यमिन्द्रं सत्य इन्दुः॥ २.०२२.०२**

अध- अथ । त्विषीमान्- बलवान् । क्रिविं- क्षेप्तारम् । युधा- युद्धेन । ओजसा- तेजसा । अभ्यभवत् । रोदसी- द्यावापृथिव्यौ । आ अपृणत्- अपूरयत् । अस्य- एतस्येन्द्रस्य । मज्मना- शोधकशक्त्या । प्र- प्रकर्षेण । वावृधे- स एवेन्द्रो ववृधे । अन्यं- रसम् । जठरे- हृदये । सीदन् वनस्य जठरे पुनानः, भीमस्य वृष्णो जठरादभिश्वसो दिवे दिवे सहुरिः स्तन्नबाधित इत्यादिषु मन्त्रेषु जठरशब्दस्य मध्यभाग इति लक्षणया सारः स्वरूपं हृदयमिति वार्थः । हूयमानः- अस्माभिराहूतः । अधत्त- दधार । ईं- एनम् । प्र अरिच्यत- प्रकर्षेण अरेचयत् । सैनं सश्चत् देवो देवं सत्यमिन्द्रं सत्य इन्दुः ॥२ ॥

Dr Rangaraj

WEBOLIM

**साकं जातः क्रतुना साकमोजसा ववक्षिथ साकं वृद्धो वीर्यैः सासहिर्मृधो विचर्षणिः।**
**दाता राधः स्तुवते काम्यं वसु सैनं सश्चद्देवो देवं सत्यमिन्द्रं सत्य इन्दुः॥ २.०२२.०३**

क्रतुना- सर्वभूतहितरत्युद्भूतसङ्कल्पमयेनाग्निना। साकम्। जातः- आविर्भूतः। ओजसा- तेजसा। साकं जातः। वीर्यैः। साकम्। वृद्धः। ववक्षिथ- वोढुमिच्छसि। मृधः- स्पर्धमानान्। सासहिः- सहसे। विचर्षणिः- विवेकी। स्तुवते- स्तोत्रे। काम्यं- कामिताम्। वसु- चित्तवृत्तिस्तम्भकारिणीम्। वसु स्तम्भे। राधः- संसिद्धिम्। दाता- यच्छसि। ॥३॥

**तव त्यन्नर्यं नृतोऽप इन्द्र प्रथमं पूर्व्यं दिवि प्रवाच्यं कृतम्।**
**यद्देवस्य शवसा प्रारिणा असुं रिणन्नपः।**
**भुवद्विश्वमभ्यादेवमोजसा विदादूर्जं शतक्रतुर्विदादिषम्॥ २.०२२.०४**

इन्द्र- परमेश्वर। नृतो- सर्वस्य नर्तयितः। नर्तक। तव- भवतः। त्यत्- तत्। नर्यं- पौरुषम्। प्रथमं- मुख्यम्। पूर्व्यं- पुराणम्। दिवि- चित्ताकाशे। प्रवाच्यं कृतं- प्रकर्षेणोक्तम्। असुं- प्राणम्। रिणन्- हिंसन्। प्राणहिंसनभूतप्राणनियमनं विना मूलशक्तिधाराणां प्रवाहस्याभावः। अतप्ततनूर्न तदामो अश्नुत इति। देवस्य शवसा- द्योतनबलेन। अपः- मूलशक्तिधाराः। प्रारिणाः- प्रेरयः। विश्वं- सर्वम्। अदेवं- अन्धकारम्। अभि भुवत्- अभिभवतु। शतक्रतुः- अनन्तप्रज्ञः। ऊर्जं- प्राणम्। इषं- सदेषणम्। विदात्- लभताम्।॥४॥

Dr. Rangaji
WEBOLIM